CAREERINDIA

**Code No. 09**

Total No. of Questions : 46 ]

Total No. of Printed Pages : 7 ]

**June/July, 2010**

# SANSKRIT

Time : 3 Hours 15 Minutes ] [ Max. Marks : 100

I. एतेषां प्रश्नानां उत्तराणि एक वाक्येन संस्कृत भाषायां लिखत — 10 × 1 = 10

1) प्रतिमानाटकं केन विरचितम् ?

2) भरतस्य अयोध्यापुर प्रवेशः कदा अपेक्षितः ?

3) दशरथेन स्त्रीशुल्कार्थे के विसर्जिताः ?

4) काभ्यां सह रामः वनमगच्छत् ?

5) अग्निः सहसा कुत्र उत्थितः ?

6) कं प्रेक्ष्य सागरिकायाः जीविताभिलाषः संवृत्तः ?

7) यौगन्धरायणेन वासवदत्तायाः हस्ते का निक्षिप्ता ?

8) कुन्ती कस्य राज्ञः पुत्री ?

9) कुरुपितामहः कः ?

10) राक्षसानां धर्मः कः ?

www.careerindia.com

[ Turn over

CAREERINDIA



II. एतेषु **त्रयाणां** भाषान्तरं कृत्वा भावं विशदयत — 3 × 4 = 12

11) त्यक्त्वा स्नेहं शीलसंक्रान्तदोषैः
पुत्रास्तावन्नत्वपुत्राः क्रियन्ते ।
लोकेऽपूर्वं स्थापयाम्येष धर्मं
भर्तृद्रोहादस्तु माताप्यमाता ॥

12) विरम विरम वह्ने मुञ्च धूमानुबन्धं
प्रकटयसि किमुच्चैरर्चिषां चक्रवालम् ।
विरहहुतभुजाऽहं यो न दग्धः प्रियायाः
प्रलयदहन भासा तस्य किं त्वं करोषि ॥

13) अम्भोज गर्भसुकुमारतनुस्तथाऽसौ
कण्ठग्रहे प्रथमरागघने विलीय ।
सद्यः पतन्मदनमार्गणरन्ध्रमार्गैः
मन्ये मम प्रियतमा हृदयं प्रविष्टा ॥

14) गिरिवनजलपुष्पैः सर्वतः शोभमाना
मृदुवहपवमाना पावनी रत्नगर्भा ।
शुभचरितविधात्री धर्मशान्त्योः सवित्री
मम हृदयमुपास्ते सौख्यदात्री प्रजानाम् ॥

15) भाग्यशाली प्रसूतव्यो न शूरो न च पण्डितः ।
शूराश्च कृतविधाश्च मत्पुत्रा भैक्षजीविनः ।

www.careerindia.com

CAREERINDIA



III. अ) **एकस्य** उत्तरं संस्कृतभाषायां, प्रादेशिकभाषायां , आंग्लभाषायां वा प्रबन्धरूपेण लिखत —

1 × 8 = 8

16) 'प्रतिमागृहम्' इत्यस्य शीर्षिकां समर्थयत ।

17) श्री हर्षस्य देशकालकृती: तथा शैलीमधिकृत्य प्रबन्धं लिखत ।

आ) **द्वयो:** लघुटिप्पण्यौ संस्कृतभाषायां, प्रादेशिकभाषायां, आंग्लभाषायां वा लिखत — 2 × 4 = 8

18) नान्दी ।

19) सुमन्त्र: ।

20) रत्नावली ।

21) विदूषक: ।

IV. **चतुर्णां** सन्दर्भं संस्कृतभाषायां सूचयत — 4 × 3 = 12

22) धरमाणानामपि प्रतिमा: स्थाप्यन्ते ?

23) हस्तस्पर्शो हि मातृणामजलस्य जलाञ्जलि: ।

24) दुखगाहा गतिर्दैवस्य ।

25) स्वप्ने मतिर्भ्रमति किंन्विदमिन्द्रजालम् ।

26) न खल्वेकचक्रो रथो गच्छति ।

27) न हि मातुराज्ञा प्रत्यादेशमर्हति ।

V. अ) **एकस्य** उत्तरं संस्कृतभाषायां, प्रादेशिकभाषायां, आंग्लभाषायां वा लिखत — ( प्रबन्ध रूपेण )

1 × 10 = 10

28) चन्द्रहास-विषययो: विवाहप्रसङ्गं सविस्तरं विवृणुत ।

29) सलादीनेन नाथनं प्रति का: प्रश्न: प्रदत्त: ? तस्य नाथन: किमुत्तरं प्रायच्छत् ?

[ Turn over

www.careerindia.com

CAREERINDIA



आ) **द्वयोः** लघुटिप्पण्यौ संस्कृतभाषायां, प्रादेशिकभाषायां, आंग्लभाषायां वा लिखत —

2 × 5 = 10

30) ग्रामाध्यक्षः ।

31) मदनः ।

32) श्रममहिमा ।

33) नाथनः ।

VI. **पञ्चानां** उपप्रश्नानां संस्कृतभाषायां उत्तराणि लिखत — 5 × 2 = 10

34) **द्वयोः** सन्धिं विभज्य सन्धिर्नाम लिखत —

नास्ति, अधुनैव, नमोऽस्तु , शूराश्च ।

35) **द्वयोः** लिङ्ग विभक्ति वचनानि लिखत —

आर्यस्य, रत्नमालाम् , काले, प्रियायाः ।

36) **द्वयोः** लकार, पुरुष, वचनानि लिखत —

रोचन्ते, आसीत् , भवेयुः, करोतु ।

37) **द्वयोः** व्याकरणरीत्या पदपरिचयं लिखत —

गत्वा, प्रविश्य, अटन् , पाण्डवः ।

38) **द्वयोः** विग्रहवाक्यं लिखत —

देवराजः, तपोधनः, महात्फलम् , वसिष्ठवामदेवौ ।

39) प्रयोग परिवर्तनं कुरुत —

भरतेन प्रतिमागृहम् प्रविष्टम् ।

**अथवा**

अहं यास्यामि ।

www.careerindia.com

CAREERINDIA



40) एतयो: वाक्ययो: व्याकरणदोषं परिहृत्य लिखत —

i) जयत भवान्

ii) गुरुं नम: ।

41) अत्रत्यमलङ्कारं सलक्षणं निर्दिशत —

''पिपासार्तोऽनुधावामि क्षीणतोयां नदीमिव'' ।

VII. 42) संस्कृतभाषायां अनुवदत — 5

ಕಾಶಿಯಲ್ಲಿ ಒಬ್ಬ ವಿದ್ವಾಂಸನಿದ್ದನು. ಅವನು ಶಾಸ್ತ್ರಾರ್ಥಗಳ ಪ್ರವಚನದಿಂದ ಜೀವಿಸುತ್ತಿದ್ದನು. ಒಂದು ದಿನ ಒಬ್ಬ ವಿದ್ಯಾರ್ಥಿಯು ವಿದ್ಯಾಭ್ಯಾಸಕ್ಕೋಸ್ಕರ ಆ ವಿದ್ವಾಂಸನ ಹತ್ತಿರ ಬಂದು ಅವನನ್ನು ಕುರಿತು ''ಗುರುಗಳೇ, ಈ ಹುಡುಗನು ವಿದ್ಯಾರ್ಜನೆಗೆ ತಮ್ಮ ಸನ್ನಿಧಿಗೆ ಬಂದಿರುತ್ತಾನೆ'' ಎಂದು ಕೇಳಿಕೊಂಡನು. ಆಗ ಆ ವಿದ್ವಾಂಸನು ಆ ಹುಡುಗನನ್ನು ಬಾಲಕನೇ, ದೇವರು ಎಲ್ಲಿದ್ದಾನೆ ? ಉತ್ತರ ಹೇಳು ಎಂದು ಕೇಳಿದನು. ಅದಕ್ಕೆ ಆ ಹುಡುಗನು ಪ್ರತಿಯಾಗಿ 'ದೇವರು ಎಲ್ಲಿ ಇಲ್ಲ ? ದಯವಿಟ್ಟು ತಿಳಿಸಿರಿ' ಎಂದು ಹೇಳಿದನು. ಇದನ್ನು ಕೇಳಿದ ವಿದ್ವಾಂಸನು ಸಂತೋಷಗೊಂಡು ''ದೇವರು ಎಲ್ಲಾ ಕಡೆ ಇದ್ದಾನೆ. ಅವನು ಸರ್ವವ್ಯಾಪ್ತಿಯು. ನನ್ನಲ್ಲಿ ಶಾಸ್ತ್ರಗಳನ್ನು ಕಲಿಯಲು ನೀನು ಅರ್ಹನು. ಆದ್ದರಿಂದ ನೀನು ನನ್ನ ಶಿಷ್ಯನಾಗು'' ಎಂದು ಹೇಳಿದನು.

There was a scholar in Kashi. He was leading his life by giving discourses on Shastras. One day a student came to him for acquiring knowledge and requested the scholar, "Revered Sir, I have come to learn under you." The scholar questioned the student, "Child ! Will you tell me where is God ?" The student replied "Sir, is there any place where God is not present ?" I beg enlightenment. Hearing this the scholar was pleased and said, "God is everywhere. He is omnipresent. You are entitled to learn Shastras from me. You can be my disciple."



www.careerindia.com

CAREERINDIA



43) इमं परिच्छेदं पठित्वा प्रश्नानां उत्तराणि लिखत — 5 × 1 = 5

अस्मान् परित: पर्वता: वृक्षा: नद्य: च सन्ति । यदा वायुमण्डले धूमेभ्य: वायु: मलिन: भवति तदा वायुमालिन्यं भवति । यदा सरोवरेषु नदीषु जलं रासायनिक वस्तुयुक्तेन दूषितजलेन प्रदूषितं भवति तदा जलमालिन्यं भवति । यदा वृक्षाणां नाश: भवति तदा परिसरनाश: भवति । शब्द: वातावरणे यदा अधिकं भवति तदा शब्दमालिन्यं भवति । अनेन जनजीवनम् दु:खकरम् भवति । यत्र मालिन्यं न सम्भवति तत्र जनजीवनम् आरोग्यकरं सुखकरं च वर्तते । अत: परिसर संरक्षणम् आवश्यकं भवति । वृक्षाणां नाश: न करणीय: । जले मालिन्यं यथा न भवेत् तथा रक्षणीयम् । प्राणिकुलं पोषणीयं पक्षिकुलं च रक्षणीयम् एवं परिसररक्षणं करणीयम् ।

i) अस्मान् परित: के सन्ति ?

ii) वायुमालिन्यं कथं भवति ?

iii) कदा परिसरनाश: भवति ?

iv) कुत्र जनजीवनं आरोग्यकरं सुखकरं भवति ?

v) कथं परिसररक्षणं करणीयम् ?

**अथवा**

प्रवासार्थं धनं इच्छन् पितरं प्रति पत्रं लिखत ।

www.careerindia.com

CAREERINDIA



VIII. 44) श्लोकस्य अन्वयं लिखत : 3

पुण्यस्य फलमिच्छन्ति पुण्यं नेच्छन्ति मानवाः ।

न पापफलमिच्छन्ति पापं कुर्वन्ति यत्नतः ॥

45) **त्रयाणामेव** यथानिर्देशं कुरुत — 3

i) गुरुः ············ ············ । ( अन्यवचने )

ii) यत्र–तत्र, यदि ···················· । ( नित्यसम्बन्धी )

iii) भामस्य जननी ·············· । ( समस्तपदं )

iv) नागानन्दम् ···················· । ( कवेः नाम ) ।

46) परिच्छेदमिमं पठित्वा आवरणस्थितानि पदानि चित्वा परिच्छेदं पूरयत — 4

एकस्मिन् ···················· गौतमः एकेन साधुना ···················· मृत्युं, व्याधिं, दुःखं चोद्दिश्य दीर्घां ···················· अकरोत् । कथं जनाः ···················· दुःखेभ्यो मुक्ता भवेयुरिति सः तं ························· अपृच्छत् । सः साधुः शान्तचित्तेन प्रत्यवदत् । दुःखपूर्णः खलु एषः संसारः । ································ । विना सत्यसुखं मानवो नाधिगच्छति । रात्रौ नगरं ···················· अभवत् । ···················· जनाः निद्रिताः आसन् ।

( नगरस्य, संसारत्यागेन, शान्तं, साधुम् , चर्चां, संसार, दिवसे, सह )



www.careerindia.com